**वार्षिक–पाठ्यक्रमः**

**सत्रम्– 2022-23**

**कक्षा –षष्ठी**

**विषयः–संस्कृतम्**

**Level-2**

| क्र० | पाठ्यवस्तु | सहायकशैक्षिक–अनुदेशाः | अधिगमसम्प्राप्तिः |
|---|---|---|---|
| 1. | **प्रथमः पाठः - अकारान्त–पुल्लिङ्गः** | ➢ चित्रमाध्यमेन शब्दपरिचयः - चषकः, सौचिकः, शुनकः इत्यादीनां प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः।<br>➢ अभिनयमाध्यमेन सर्वनामपरिचयः – एतत्, तत्, किम् इति एतेषां पुल्लिङ्गे प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः।<br>➢ अभिनयमाध्यमेन क्रियापदपरिचयः - अस्, कृ, खेल्, पठ्, धाव्, हस् इत्यादीनां धातूनां लट्लकारे प्रथमपुरुषे त्रिषु वचनेषु अभ्यासः।<br>➢ वाक्यरचनाभ्यासः, अभ्यासकार्यम्।<br>**चित्राधारितरिक्तस्थानपूर्तिः** – तालः, भल्लूकः इत्यादिचित्राणां बालाः नामलेखनं करिष्यन्ति।<br>➢ **शब्दरूपाणि** – देव, लता, फल\|<br>➢ **पुनरावलोकनम्-** वर्णमालायाः अभ्यासः। वर्णमालागीतम्-2 यूट्यूब–सहायतया शिक्षणीयम्। कमलं विकसति सुन्दर–सरसि ……….\|<br>http://youtu.be/vij97ix2JwY; https://youtu.be/MIqt8CiRQis | पुल्लिङ्गशब्दान् सर्वनामशब्दान् तथा धातुरूपाणि त्रिषु वचनेषु जानन्ति। |
| 2. | **द्वितीयः पाठः- आकारान्त–स्त्रीलिङ्गः** | ➢ चित्रमाध्यमेन शब्दपरिचयः - दोला, घटिका, चालिका, चटका इत्यादीनां प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः।<br>➢ अभिनयमाध्यमेन सर्वनामपरिचयः – एतत्, तत्, किम् इति एतेषां स्त्रीलिङ्गे प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः। | स्त्रीलिङ्गशब्दरूपाणि सर्वनामशब्दरूपाणि तथा धातुरूपाणि जानन्ति। |
| 3. | **तृतीयः पाठः- अकारान्त–नपुंसकलिङ्गः** | ➢ चित्रमाध्यमेन शब्दपरिचयः - खनित्रम्, सूत्रम्, यानम्, करवस्त्रम्, फलम्, भवनम् इत्यादीनां प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः।<br>➢ अभिनयमाध्यमेन सर्वनामपरिचयः-तत्, एतत्, किम् इति नपुंसकलिङ्गे प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः।<br>➢ **धातुरूपाणि** – अभिनयमाध्यमेन क्रियापदपरिचयः - पठ् (लट्, लृट्, लङ्-लकारेषु) वाक्यरचनाभ्यासः, अभ्यासकार्यम्।<br>➢ गतिविधयः – अस्ति, नास्ति, आम्, न, किम् प्रश्नोत्तराभ्यासः। | नपुंसकलिङ्गशब्द-रूपाणि सर्वनाम-शब्दरूपाणि अव्ययशब्दान् च ज्ञात्वा प्रयोगे समर्थाः भवन्ति। |
| 4. | **चतुर्थः पाठः - विद्यालयः** | ➢ आदर्शवाचनम्, अनुवाचनम्, शब्दार्थज्ञानम्, अभ्यासकार्यम्।<br>➢ गतिविधयः –**'मम परिचयः'** इति विषये मम नाम ----। भवतः/ भवत्याः/ विद्यालयस्य/निवासस्थानस्य/जनकस्य नाम इत्यादीनि वाक्यानि वदेयुः।<br>➢ **सामूहिक–गतिविधिः** –<br>➢ पाठ्यक्रमानन्तरं समयः शिष्ट स्यात्तर्हि संस्कृतकविताः यथा– मम माता देवता, चटका चटका रे चटका यूट्यूब–सहायतया शिक्षणीयम्, अनन्तरं ते | स्वकीयं परिचयं विद्यालयस्य च परिचयं संस्कृतभाषायां वक्तुं लेखितुं च समर्थाः भवन्ति। |

| | | | |
|---|---|---|---|
| | | स्वयमेव गायने कुशलाः भवन्ति। | |

➢ **सूचना : उपर्युक्तं सकलं पाठ्यक्रमं 30 सितम्बर 2022 पर्यन्तं समापनीयम्।**

➢ **मध्यावधिपरीक्षादृष्ट्या उपर्युक्तस्य सकलपाठ्यक्रमस्य पुनरावृत्तिः।**

➢ **प्रदत्तं सकलं पाठ्यक्रमं मूल्याङ्कनहेतोः वर्तते।**

**मध्यावधि परीक्षा**

| क्र० | पाठ–परिचयः | विषयवस्तु | अधिगमसम्प्राप्तिः |
|---|---|---|---|
| **5.** | **सप्तमः पाठः - बकस्य प्रतीकारः** | ➢ आदर्शवाचनम्, अनुवाचनम्, शब्दार्थज्ञानम्, अभ्यासकार्यम्।<br>➢ तत्समपदानाम् अभ्यासः - सियार-श्रृगालः, कौआ-काकः इत्यादयः।<br>**संख्या – 1 तः 20 पर्यन्तम्।**<br>छात्राः मातृभाषायाम् अन्यासु भाषासु च संख्यां जानन्ति तस्य पुनरावर्तनं कारणीयम् एकतः चत्वारि पर्यन्तं त्रिषु लिङ्गेषु अभ्यासः। पञ्चतः आरभ्य सामान्यम्।<br>गतिविधिः– संख्यागीतम् यूट्यूब–सहायतया शिक्षणीयम्,<br>एकम् एकम् आगच्छ–२। द्वे–द्वे स्वागतम्–२। त्रीणि–त्रीणि उपविश–२। चत्वारि–चत्वारि कुशलं किम्?–२ पञ्च–पञ्च कः विशेषः?–२ षड्–षड् कृपया वद–२ सप्त–सप्त दुग्धं पिब–२ अष्ट– अष्ट पुनर्मिलाम–२ नव–नव नमस्ते–२ दश–दश ओम्–ओम्–२ ॥ | रोचककथामाध्यमेन छात्राः अव्ययशब्दान् जानन्ति। गद्यविधायां पठनकौशलं च प्राप्नुवन्ति। |
| **6.** | **नवमः पाठः - क्रीडास्पर्धा** | ➢ आदर्शवाचनम्, अनुवाचनम्, शब्दार्थज्ञानम्, अभ्यासकार्यम्।<br>➢ पञ्चमी-षष्ठीविभक्त्योः अभ्यासः।<br>➢ यथा, रामः-रामात्-रामस्य। सीता-सीतायाः-सीतायाः<br>यथा - रामस्य पुत्रः लवः। लवस्य पिता रामः। उमायाः पतिः शिवः। शिवस्य पत्नी उमा। एवमेव अन्यपदानामपि स्फोरकपत्रमाध्यमेन अभ्यासः कारणीयः। | कथायाः रसास्वादं कुर्वन्ति। पञ्चमीविभक्तौ षष्ठीविभक्तौ च त्रिषु लिङ्गेषु शब्दानां प्रयोगे समर्थाः भवन्ति। धातूनां लृट्लकारे रूपाणि ज्ञात्वा वाक्ये प्रयोगं कुर्वन्ति। |

| | | | | | |
|---|---|---|---|---|---|
| रामः | | लवः | उमा | | शिवः |
| शिवः | पुत्रः | गणेशः | सीता | पति | रामः |
| दुष्यन्तः | | भरतः | देवकी | | वसुदेवः |
| वसुदेवः | | कृष्णः | कैकेयी | | दशरथः |
| दशरथः | पिता | रामः | गान्धारी | पत्नी | धृतराष्ट्रः |
| रावणः | | मेघनादः | मन्दोदरी | | रावणः |

➢ लृट्लकारे वाक्यप्रयोगः परिवर्तनाभ्यासश्च

यथा - पठति-पठिष्यति। वदति-वदिष्यति। चलति-चलिष्यति।

छात्रः हसति - छात्रः हसिष्यति। बालकः पठति - बालकः पठिष्यति। एवमेव अन्यवाक्यानाम् अभ्यासः कारणीयः।

**अव्ययानि** – अपि, च, एव, वा, न, पुनः।

| | | | |
|---|---|---|---|
| **7.** | **त्रयोदशः पाठः विमानयानं रचयाम** | ➢ सस्वरगायनम्, शब्दार्थज्ञानम्, अभिनयपूर्वकं कण्ठस्थीकरणम्/लयाभ्यासः, अभ्यासकार्यम्।<br>➢ लङ्लकारे परिवर्तनाभ्यासः वाक्यप्रयोगश्च।<br>पठति-अपठत्, लिखति-अलिखत्, गच्छति-अगच्छत्।<br>बालकः गृहं गच्छति। - बालकः गृहं अगच्छत्। | सस्वरगायनपूर्वकं पद्यपाठे समर्थाः भवन्ति।<br>इकारान्तस्य उकारान्तस्य च शब्दानां प्रयोगः पठ्-लिख्-प्रभृतिक्रियारूपैः सह कर्तुं समर्थाः भवन्ति। |
| **8.** | **पञ्चदशःपाठः मातुलचन्द्रः!! (बालगीतम्)** | ➢ सस्वरगायनम्, शब्दार्थज्ञानम्, अभिनयपूर्वकं कण्ठस्थीकरणम्/लयाभ्यासः, अभ्यासकार्यम्।<br>➢ शब्दपरिचयः - इकारान्तः उकारान्तश्च।<br>➢ पाठ्यक्रमानन्तरं समयः शिष्ट स्यात्तर्हि संस्कृतकविताः यथा– मम माता देवता, https://youtu.be/9AK-VLzJl4Y चटका चटका रे चटका, https://youtu.be/3d-64p0pd04 वर्णमालागीतम्-1 यूट्यूब–सहायतया शिक्षणीयम्, अनन्तरं ते स्वयमेव गायने कुशलाः भविष्यन्ति। | पाठस्य रसास्वादं कुर्वन्ति। |

- **सूचना : उपर्युक्तं सकलं पाठ्यक्रमं 31 जनवरी 2023 पर्यन्तं समापनीयम्।**
- **वार्षिक–परीक्षादृष्ट्या उपर्युक्तस्य सकलपाठ्यक्रमस्य पुनरावृत्तिः।**
- **प्रदत्तं सकलं पाठ्यक्रमं मूल्याङ्कनहेतोः वर्तते।**
- **पाठ्यपुस्तकम् – रुचिरा (प्रथमः भागः)**

**वार्षिक– परीक्षा**